श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ काञ्चनपद्धतिः द्वाविंशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ काञ्चनपद्धतिः द्वाविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

कल्याणप्रकृतिं वन्दे भजन्तीं काञ्चनश्रियम्।
पदार्हां पादुकां शौरेः पद एव निवेशिताम्॥ २२.१ ॥

मधुजित्तनुकान्तितस्कराणां जलदानामभयं विधातुकामा।
चपलेव तदङ्घ्रिमाश्रयन्ती भवती काञ्चनपादुके ! विभाति॥ २२.२ ॥

निकषीकृतरम्यकृष्णरत्ना भवती काञ्चनसंपदं व्यनक्ति।
परिपुष्यति पादुके ! यदीक्षा सहसा नः समलोष्टकाञ्चनत्वम्॥ २२.३ ॥

सुरभिर्निगमैः समग्रकामा कनकोत्कर्षवती पदावनि ! त्वम्।
दिशसि प्रतिपन्नमाधवश्रीः अनिशोन्निद्रमशोकवैभवं नः॥ २२.४ ॥

सति वर्णगुणे सुवर्णजातेः जगति ख्यातमसौरभादवर्णम्।
श्रुतिसौरभशालिना स्वहेम्ना भवती शौरिपदावनि ! व्युदास्थत्॥ २२.५ ॥

प्रतिपन्नमयूरकण्ठधाम्ना परिशुद्धेन पदावनि ! स्वकेन।
कमलास्तनभूषणोचितं तत् भवती रत्नमलङ्करोति हेम्ना॥ २२.६ ॥

कान्त्या परं पुरुषमाप्रणखात् सुवर्णं
कर्तुं क्षमा त्वमसि काञ्चनपादरक्षे !।
अन्यादृशीं दिशसि या विनतस्य दूराद्
आरग्वधस्तबकसम्पदमिन्दुमौळेः॥ २२.७ ॥

चन्द्राकृतिः कथमकल्पयथास्तदानीं
वैमानिकप्रणयिनीवदनाम्बुजानाम्।
विक्रान्तिकालवितलेन निजेन धाम्ना
बालातपं बलिविमर्दनपादुके ! त्वम्॥ २२.८ ॥

लेभे तदाप्रभृति नूनमियं भवत्याः
    कान्त्या कवेरतनया कनकापगात्वम्।
यावन्मुकुन्दपदहेमपदावनि ! त्वं
    पुण्यं विभूषितवती पुळिनं तदीयम्॥ २२.९ ॥

चित्रं सरोजनिलयासहितस्य शौरेः
    वासोचितानि चरणावनि ! संविधित्सोः।
सद्यो विकासमुपयान्ति समाधिभाजां
    चन्द्रातपेन तव मानसपङ्कजानि॥ २२.१० ॥

त्वय्येव पादमधिरोप्य नवं प्रवाहं
    नाथे पदावनि ! निशामयितुं प्रवृत्ते।
आत्मीयकाञ्चनरुचा भवती विधत्ते
    हेमारविन्दभरितामिव हेमसिन्धुम्॥ २२.११ ॥

विहरति पुळिनेषु त्वत्सखे रङ्गनाथे
    कनकसरिदियं ते पादुके ! हेमधाम्ना।
वहति सलिलकेळीस्रस्तचोळावरोध-
    स्तनकलशहरिद्रापङ्कपिङ्गामवस्थाम्॥ २२.१२ ॥

सुरभिनिगमगन्धा सौम्यपद्माकरस्था
    कनककमलिनीव प्रेक्ष्यसे पादुके ! त्वम्।
भ्रमर इव सदा त्वां प्राप्तनानाविहारः
    शतमखमणिनीलः सेवते शार्ङ्गधन्वा॥ २२.१३ ॥

कनकरुचिरवर्णां पादुके ! सह्यसिन्धुः
    श्रियमिव महनीयां सिन्धुराजस्य पत्नी।
स्वयमिह सविधस्था सौम्यजामातृयुक्ताम्
    उपचरति रसेन त्वामपत्याभिमानात्॥ २२.१४ ॥

अनुकलमुपजीव्या दृश्यसे निर्जराणां
    त्रिपुरमथनमौळौ शेखरत्वं दधासि।

प्रतिपदमधिगम्य प्राप्तशृङ्गासि शौरेः
तदपि चरणरक्षे ! पूर्णचन्द्राकृतिस्त्वम्॥ २२.१५ ॥

कनकमपि तृणं ते मन्वते वीतरागाः
तृणमपि कनकं ते जानते त्वत्प्रकाशैः।
मधुरिपुपदरक्षे ! यत् त्वदर्थोपनीतान्
परिणमयसि हैमान् देवि ! दूर्वाङ्कुरादीन्॥ २२.१६ ॥

विशुद्धिमधिगच्छति ज्वलनसङ्गमात् काञ्चनं
विदन्ति च जगन्ति तन्न खलु तद्विपर्यस्यति।
कथं कनकपादुके ! कमललोचने साक्षिणि
त्वयैव परिशुद्धता हुतभुजोऽपि जाघट्यते॥ २२.१७ ॥

तारासङ्गप्रथितविभवां चारुजाम्बूनदाभां
त्वामारूढस्त्रिदशमहितां पादुके ! रङ्गनाथः।
सञ्चारिण्यां सुरशिखरिणस्तस्थुषा मेखलायां
धत्ते मत्तद्विरदपतिना साम्यकक्ष्यां समीक्ष्याम्॥ २२.१८ ॥

कनकरुचिरा काव्याख्याता शनैश्चरणोचिता
श्रितगुरुबुधा भास्वद्रूपा द्विजाधिपसेविता।
विहितविभवा नित्यं विष्णोः पदे मणिपादुके !
त्वमसि महती विश्वेषां नः शुभा ग्रहमण्डली॥ २२.१९ ॥

प्रज्वलितपञ्चहेतिर्हिरण्मयीं त्वां हिरण्यविलयार्हः।
आवहतु जातवेदाः श्रियमिव नः पादुके ! नित्यम्॥ २२.२० ॥

॥ इति श्रीपादुकासहस्रे काञ्चनपद्धतिः द्वाविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥